अष्टमः पाठः

जलमेव जीवनम्



अस्माकं जीवनस्य सुखाय प्रकृतिः नाना पदार्थान् धारयति। तेषु वनस्पतयः, पशुपक्षिणः, मेघः, सूर्यः, भूमिः, पर्वतः, पवनः, जलम् इत्येते सन्ति। सर्वेषु च जलस्य प्रधानता वर्तते। जलं विना मानवो न जीवति, वनस्पतयः शुष्यन्ति, मेघाः न भवन्ति, अन्नं न जायते। भूमिः अपि शुष्यति। अतो जलं सर्वस्य जीवनम् अस्ति।

भूमौ जलस्य नाना स्थानानि सन्ति। क्वचित् नदी, क्वचित् सरोवरः, विशालः सागरश्च अस्ति। सागरे तु जलं क्षारम् अस्ति। मेघः क्षारं जलं पीत्वा मधुरं जलं ददाति। नद्यां सरोवरे च जलं मधुरं भवति। जनाः कूपान् खनित्वा जलं निष्कासन्ति। क्वचित् कूपे मधुरं पेयं जलं भवति, क्वचित् क्षारम् अपेयं जलं भवति।

अधुना भूमिगतं जलमपि यन्त्रेण निष्कासन्ति। क्षेत्राणां सेचने सर्वस्य जलस्य प्रयोगः भवति। सेचनात् क्षेत्रेषु अन्नं भवति। वनस्पतयः वर्षाजलेन जीवन्ति। अतः सर्वेषां जीवानां वनस्पतीनां भूमेश्च जीवनं जलमेव अस्ति।

शब्दार्थः

अस्माकम्		हमारा/री/रे
सुखाय	=	सुख के लिए
नाना	=	विविध, अनेक प्रकार के
पदार्थान्	=	वस्तुओं को
सर्वेषु	=	सब में
धारयति	=	धारण करता /करती है
शुष्यन्ति	=	सूख जाते/जाती हैं
जायते	=	होता/होती है
क्षारम्	=	खारा
मधुरम्	=	मीठा
खनित्वा	=	खोदकर
निष्कासन्ति	=	निकालते/निकालती हैं
क्वचित्	=	कहीं
कूपान्	=	कुओं को
पेयान्	=	पीने योग्य
अधुना	=	आजकल
यन्त्रेण	=	मशीन के द्वारा
क्षेत्राणाम्	=	खेतों की/का/के
सेचने	=	सिंचाई में
सेचनात्	=	सिंचाई से
क्षेत्रेषु	=	खेतों में
जीवानाम्	=	प्राणियों का/की/के
भवति	=	होता है

व्याकरणम्

सन्धि-विच्छेद:/पदविभाग:

जलमेव	=	जलम् + एव
इत्येते	=	इति + एते

सागरश्च = सागरः + च

भूमेश्च – भूमेः + च

जलमपि – जलम् + अपि

वर्ण-विशेषाः

क्ष त्र ज्ञ – देवनागरी लिपि में ये तीनों संयुक्ताक्षर हैं–

क् + ष = क्ष ।

त् + र = त्र ।

ज् + ञ = ज्ञ ।

अभ्यासः

मौखिकः

1. इन शब्दों का अर्थ बताएँः-

अस्माकम्, धारयति, शुष्यन्ति, क्वचिद्, क्षारम्, कूपान्, यन्त्रेण, क्षेत्राणाम्, जीवम्, सर्वेषाम् ।

2. निम्नलिखित शब्दों से वाक्य बनाएँः-

सूर्यः, पवनः, जलमेव, मधुरम्, अस्ति ।

लिखितः

3. मञ्जूषा से सही शब्द चुनकर रिक्त स्थानों को भरें :-

शुष्यति, जलमेव, जीवन्ति, प्रधानता, सरोवरे

(क) ..... जीवनम्।

(ख) सर्वेषु च जलस्य ..... वर्तते।

(ग) भूमिः अपि ..... ।

(घ) नद्यां ..... च जलं मधुरं भवति।

(ङ) वनस्पतयः वर्षाजलेन .....।

4. पाठ के आधार पर जल की महत्ता पर पाँच वाक्य लिखें ।

5. पाठ के आधार पर निम्नलिखित वाक्यों का संस्कृत ढूँढ़कर लिखें –

(क) जल मीठा है। (अस्ति)

(ख) समुद्र का जल खारा होता है। (क्षारम्)

(ग) नदी का जल मीठा होता है। (मधुरं)

(घ) जल सब का जीवन है । (जीवनम्)

(ङ) खेतों में अन्न होता है । (क्षेत्रेषु)

6. सन्धि-विच्छेद/पदविभाग करें-

सागरश्च, जलमपि, कोऽपि, जलमेव, तथापि।

7. सही विकल्प चुनें:-

(क) खाना – भोजनम्, फलम्, मिष्टान्नम् ।

(ख) जल – जलम्, जले, जलेन ।

(ग) खेत में – क्षेत्राणि, क्षेत्रेषु, क्षेत्रम् ।

(घ) सूर्य – सूर्यः, सूर्यम्, सूर्याय ।

(ङ) सूखता है – शुष्यन्ति, शुष्यति, शुष्यतः ।

8. निम्नलिखित शब्दों का वर्ण-विच्छेद करें-

जैसे- जले = $\frac{\text{ज् + अ}}{\text{ज}}$ $\frac{\text{ल् + ए}}{\text{ले}}$

(क) मेघः = ...।

(ख) पवनः = ...।

(ग) जनाः = ...।

(घ) जीवनम् = ...।

9. निम्नलिखित वर्णों को मिलाएँ-

जैसे- क् + र = क्र

र् + क = र्क

(क) र् + प =

(ख) प् + र =

(ग) ल् + प =

(घ) प् + ल =

(ङ) ज् + य =

नवमः पाठः

खेलक्षेत्रम्

रमेशः – मित्र रहीम! इदानीं सन्ध्याकालः वर्तते। चल, खेलक्षेत्रे गच्छाव।

रहीमः – खेलक्षेत्रम् अस्माकं मनोरञ्जनस्य व्यायामस्य च स्थलं भवति। अवश्यं गमिष्यामि।

(मार्गे शीला मिलति)

शीला – युवां कुत्र गच्छथः?

रहीमः – आवां खेलक्षेत्रं गच्छावः। किं तवापि इच्छा खेलक्षेत्रस्य भ्रमणाय अस्ति? यदि वर्तते तदा त्वमपि चल।

(सर्वे खेलक्षेत्रं प्रविशन्ति)

रमेशः – अत्र अनेके बालकाः बालिकाश्च सन्ति। केचित् कन्दुकेन खेलन्ति। अपरे कन्दुकक्रीडां पश्यन्ति।

शीला – आम् आम्! कन्दुकं लक्ष्यं प्रविशति तदा महान् कोलाहलो भवति। पुनः केन्द्रस्थाने कन्दुकं नयन्ति बालकाः। तदा नवीना क्रीडा भवति।

सीमा – शीले! त्वमत्र कन्दुकक्रीडां पश्यसि। चल, तत्र बालिकाः बैडमिन्टनखेलं खेलन्ति। अन्याः तं खेलं पश्यन्ति।

शीला – चल, आवां खेलदर्शनाय तत्र गच्छाव। इदं खेलक्षेत्रं विशालम्। अनेकाः क्रीडाः अत्र भवन्ति। खेलक्षेत्रस्य दर्शनेन महान् उत्साहः आनन्दश्च भवतः। अतः वयं खेलक्षेत्रं सन्ध्याकाले प्रतिदिनं गच्छामः।

(खेलक्षेत्रस्य दर्शनात् परं सर्वे स्वं स्वं गृहं गच्छन्ति।)

शब्दार्थः

इदानीम्	=	इस समय, अभी
सन्ध्याकालः	=	शाम का समय
वर्तते	=	है
खेलक्षेत्रे	=	खेल के मैदान में
गच्छाव	=	(हम दोनों) चलें
अस्माकम्	=	हम लोगों का
मनोरंजनस्य	=	मनोरंजन का
स्थलम्	=	जगह
भवति	=	होता है / है
मार्गे	=	रास्ते में
युवाम्	=	तुम दोनों
तवापि (तव+अपि)	=	तुम्हारा भी
भ्रमणाय	=	घूमने के लिए
केचित्	=	कोई
पश्यन्ति	=	देखते हैं
कोलाहलः	=	शोरगुल
केन्द्रस्थाने	=	बीच में, मध्य में
नवीना	=	नयी
त्वमत्र (त्वम् + अत्र)	=	तुम यहाँ
अन्याः	=	दूसरे लोग (स्त्रीलिंग)

दर्शनाय	=	देखने के लिए
दर्शनेन	=	देखने से/देखकर
अतः	=	इसलिए
दर्शनात्	=	देखने के बाद/देखने से
स्वं - स्वम्	=	अपने - अपने
गच्छन्ति	=	जाते हैं

व्याकरणम्

1. अनुस्वार और म् का प्रयोग

संस्कृत भाषा के शब्दरूपों और धातुरूपों में 'म्' का ही प्रयोग होता है। जैसे - अहम्, आवाम्, वयम् । इसलिए किसी शब्द का मौलिक रूप 'म्' से ही बनता है। किन्तु 'म्' की संधि होने पर कहीं कहीं अनुस्वार (ं) हो जाता है। व्यंजन वर्ण के पूर्व 'म्' का अनुस्वार होता है; जैसे - अहम्+हसामि - अहं हसामि।

अस्माकम्+गृहम् - अस्माकं गृहम्।

स्वर वर्ण के पूर्व अथवा विराम चिह्न के पूर्व म् नहीं बदलता, जैसा का तैसा रहता है। जैसे - गच्छामि अहम्।

अहम् आनयामि - अहमानयामि। अहम्+एव - अहमेव। इन्हें मिलाकर लिखना अच्छा है किन्तु नहीं मिलाने की स्थिति में म् ही लिखें, अनुस्वार कभी न दें।

2. स्थानवाचक अव्यय

संस्कृत में त्र (त्रल्) प्रत्यय से स्थानवाचक अव्यय बनते हैं जैसे –

इदम् + त्र	=	अत्र (यहाँ, इस स्थान पर)
किम् + त्र	=	कुत्र (कहाँ, किस स्थान पर)
तद् + त्र	=	तत्र (वहाँ, उस स्थान पर)
सर्व + त्र	=	सर्वत्र (सभी स्थानों पर)
पर + त्र	=	परत्र (दूसरे स्थान पर)

3. विशेषण - विशेष्य-सम्बन्ध–

(विशेष्यं यादृशं वाक्ये तादृशं स्याद् विशेषणम्)

किसी वाक्य में जिस लिंग और वचन का विशेष्य होता है उसी लिंग और वचन का प्रयोग विशेषण में भी होता है । इतना ही नहीं, विशेषण में विभक्ति भी विशेष्य के अनुसार ही होती है । निम्नलिखित उदाहरणों को देखें –

सुन्दरम् पुष्पम् (सुन्दर फूल) ।

पक्वानि फलानि (पके हुए फल) ।

निपुणाः छात्राः (तेज लड़के, तेज लड़कियाँ) ।

अल्पानि चित्राणि (कम चित्र) ।

मूर्खस्य सेवकस्य (मूर्ख सेवक का) ।

शोभने सरोवरे (सुन्दर तालाब में) ।

निकटात् ग्रामात् (समीप के गाँव से) ।

निर्धनाय छात्राय (गरीब छात्र के लिए) ।

पीतेन वस्त्रेण (पीले कपड़े से) ।

उष्णं जलम् (गर्म पानी) ।

शुष्कः काष्ठः (सूखी लकड़ी) ।

गम्भीरः शिक्षकः (गम्भीर शिक्षक) ।

अभ्यासः

मौखिकः

1. कोष्ठगत शब्दों को सही रूपों में बदलकर रिक्त स्थानों की पूर्ति करें :–

जैसे– अहं विद्यालयं गच्छामि ।		**(विद्यालय)**
(क)	सः ..... खादति।	(ओदन)
(ख)	इदानीं ..... वर्तते।	(संध्याकाल)
(ग)	युवां कुत्र .....।	(गम् = गच्छ)
(घ)	तदा नवीना क्रीडा .....।	(भू = भव)
(ङ)	त्वं संध्याकाले प्रतिदिनं .....।	(पठ्)

2. निम्नलिखित शब्दों से एक-एक वाक्य बनाएँ :–

इदानीम्, खेलक्षेत्रम्, बालकाः, कन्दुकम्, विशालः।

3. निम्नांकित रिक्तियों को भरकर वाक्य-निर्माण करें :–

जैसे–	बालकः	पुस्तकं	पठति
(क)	अश्वः	घासम् (तृणम्)	..... ।
(ख)	अजा	फलम्	..... ।
(ग)	गजः	भारम्	..... ।
(घ)	.....	फलम्	क्रीणाति ।
(ङ)	.....	शनैः शनैः	धावति ।

लिखितः

4. उदाहरण के अनुसार रिक्त स्थान भरें :–

पुरुष	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	क्रीडति	क्रीडतः	क्रीडन्ति
मध्यम पुरुष	क्रीडसि	.....	क्रीडथ
उत्तम पुरुष	.....	क्रीडावः	.....

5. निम्नलिखित शब्दों को सुमेलित करें :–

(i)	खेलक्षेत्रम्	(क)	मिलति
(ii)	शीला	(ख)	कोलाहलः
(iii)	महान्	(ग)	विस्तृतम्
(iv)	नवीना	(घ)	संध्याकालः
(v)	इदानीम्	(ङ)	क्रीडा

6- fuEufyf[kr okD;ksa dks lqesfyr djsa %µ

(क)	इस समय सबेरा है।	(i)	अत्र केवलाः बालिकाः खेलन्ति।
(ख)	चलो, घर चलें।	(ii)	इदानीं प्रातः कालः वर्तते।
(ग)	यहाँ केवल लड़कियाँ खेलती हैं।	(iii)	अत्र अनेकाः क्रीडाः भवन्ति।
(घ)	यह मैदान विशाल है।	(iv)	चल, गृहं चलामः।
(ङ)	यहाँ अनेक खेल होते हैं।	(v)	इदं खेलक्षेत्रं विशालम्।

7. निम्नलिखित शब्दों का शुद्ध रूप लिखें :–

(क) खेलक्षेत्रः

(ख) व्यामस्य

(ग) भर्मणाय

(घ) कनदुकम्

(ङ) क्रिडा

8. उत्तराणि लिखत :–

(क) खेलक्षेत्रं किमर्थं भवति ?

(ख) आवां कुत्र गच्छावः ?

(ग) सर्वे कुत्र प्रविशन्ति ?

(घ) कदा महान् कोलाहलो भवति ?

(ङ) वयं संध्याकाले कुत्र गच्छामः ?

दशमः पाठः

सामाजिकं समत्वम्

मनुष्यः सामाजिकः प्राणी वर्तते। समाजं विना मनुष्याणां जीवनं कठिनं भवति। एकं भवनं जनानां सहयोगेन निर्मितं भवति। केचन जनाः इष्टकानां निर्माणम् अकुर्वन्। केचन अस्य भवनस्य कपाट-गवाक्षयोः निर्माणम् अकुर्वन्। एवमेव सामाजिक-सहयोगेन एव अनेकानि वस्तूनि निर्मितानि भवन्ति ।

अस्माकं देशे विविधाः जनाः वसन्ति। विविधान् धर्मान् ते आचरन्ति। किन्तु सर्वे भ्रातृभावेन निवसन्ति। वयं परस्परं सौहार्देन निवसामः। ईद-होलिका-क्रिसमस-प्रभृतीनाम् उत्सवानाम् अवसरेषु परस्परं सहयोगं कुर्मः।

केचन जनाः धर्मकारणात् विवादं कुर्वन्ति। ते स्वधर्मं श्रेष्ठं वदन्ति। परधर्मं हीनं गणयन्ति। वस्तुतः सर्वे धर्माः समानाः सन्ति।

एवमेव समाजे केचन संपन्नाः, केचन निर्धनाः सन्ति। सर्वे समाजस्य सदस्याः एव सन्ति। तेषु परस्परं समता भवेत्। यन्त्रस्य एकैकः खण्डः अनिवार्यः अस्ति। तथैव समाजस्य सर्वे जनाः अनिवार्याः सन्ति।

यदा भारतीयाः परस्परं सौहार्देन निवसेयुः, तदा भारतवर्षं विश्वस्य प्रबलं राष्ट्रं भवेत् ।

शब्दार्थः

समत्वम्	=	समता, एकता
इष्टकानाम्	=	ईंटों का
अकुर्वन्	=	किये
केचन	=	किन्हीं ने / कोई
अस्य	=	इसका / इसकी / इसके
भवनस्य	=	मकान के
कपाटः	=	किवाड़, दरवाजा
गवाक्षः	=	खिड़की
एवमेव	=	इसी प्रकार

एव	=	ही
अस्माकम्	=	हमारा / हमारी / हमारे
जनाः	=	लोग
वसन्ति	=	बसते हैं
मन्यन्ते	=	मानते हैं
भ्रातृभावेन	=	भाईचारे के साथ / भाई-भाई की तरह
प्रभृतीनाम्	=	इत्यादि का
कुर्मः	=	(हम) करते हैं
स्वधर्मम्	=	अपने धर्म को
परधर्मम्	=	दूसरों के धर्म को
हीनम्	=	छोटा / तुच्छ
निर्धनाः	=	गरीब
तेषु	=	उनमें
यन्त्रस्य	=	मशीन का
एकैकः	=	प्रत्येक / सभी
खण्डः	=	टुकड़ा / भाग

व्याकरणम्

निम्नलिखित व्युत्पन्न अव्यय पदों का बहुधा प्रयोग होता है। इन्हें जानना आवश्यक है :

अत्र	=	यहाँ
कुत्र	=	कहाँ
तत्र	=	वहाँ
यत्र	=	जहाँ
सर्वत्र	=	सभी जगह
एकत्र	=	एक जगह
अन्यत्र	=	दूसरी जगह
यदा	=	जब

कदा	=	कब
तदा	=	तब
सदा	=	हमेशा
एकदा	=	एक बार
सर्वदा	=	हमेशा
इतः	=	यहाँ से
कुतः	=	कहाँ से, क्यों
यतः	=	जहाँ से
सर्वतः	=	सभी जगह से
विद्यालयतः	=	स्कूल से
गृहतः	=	घर से

अभ्यासः

मौखिकः

1. उच्चारण करें :–

(क)	मनुष्यस्य	मनुष्ययोः	मनुष्याणाम्
	जनस्य	जनयोः	जनानाम्
	भवनस्य	भवनयोः	भवनानाम्
	उत्सवस्य	उत्सवयोः	उत्सवानाम्
	यन्त्रस्य	यन्त्रयोः	यन्त्राणाम्
(ख)	बालके	बालकयोः	बालकेषु
	देशे	देशयोः	देशेषु
	अवसरे	अवसरयोः	अवसरेषु
	समाजे	समाजयोः	समाजेषु
	दिवसे	दिवसयोः	दिवसेषु

लिखितः

2. कोष्ठ में दिये गये शब्दों में षष्ठी विभक्ति का रूप देकर रिक्त स्थानों को भरें :–

यथा– रामः दशरथस्य पुत्रः आसीत्। (दशरथ)

(क) पाटलिपुत्रं ..... राजधानी अस्ति। (बिहार)

(ख) डाक्टर राजेन्द्रप्रसादः ..... प्रथमः राष्ट्रपतिः आसीत्। (भारत)

(ग) सीता ..... पत्नी आसीत्। (राम)

(घ) अहं ..... छात्रः अस्मि। (षष्ठवर्ग)

(ङ) ..... जलं क्षारं भवति। (समुद्र)

(च) ..... उत्तरदिशायां हिमालयः अस्ति। (भारत)

3. सुमेलित करें :–

(i)	कुम्भकारः	(क)	पाकं करोति।
(ii)	स्वर्णकारः	(ख)	पादत्राणं रचयति।
(iii)	रजकः	(ग)	काष्ठसामग्रीं निर्माति।
(iv)	चर्मकारः	(घ)	छात्रान् पाठयति।
(v)	काष्ठकारः	(ङ)	अलंकारं रचयति।
(vi)	पाचकः	(च)	कुम्भं करोति।
(vii)	शिक्षकः	(छ)	वस्त्रं प्रक्षालयति।

4. मंजूषा में से सही शब्द चुनकर रिक्त स्थानों को भरें :–

प्रणमन्ति, विकसन्ति, अस्ति, सन्ति, गुञ्जन्ति, पठामः, पाठयन्ति

(क) अयम् अस्माकं विद्यालयः .....।

(ख) वयं विद्यालये .....।

(ग) विद्यालये सप्त शिक्षकाः .....।

(घ) ते अस्मान् .....।

(ङ) सर्वे विद्यार्थिनः अध्यापकान् .....।

(च) उद्याने विविधानि पुष्पाणि .....।

(छ) पुष्पेषु भ्रमराः .....।

5. **निम्नांकित शब्दों का वर्ण-विच्छेद करें :–**

यथा **विद्यार्थी** = व् + इ + द् + य् + आ + र् + थ् + ई

विद्यालयः =

श्रवणम् =

दृश्यम् =

शिक्षकः =

महोत्सवः =

6. **निम्नलिखित विषयों पर हिन्दी में पाँच-पाँच वाक्य लिखें :–**

ईद, होली, क्रिसमस ।

7. **संस्कृते प्रश्नानाम् उत्तराणि लिखत :–**

(क) मनुष्यः कीदृशः प्राणी अस्ति ?

(ख) कं विना जीवनं कठिनं भवति ?

(ग) अस्माकं देशस्य किं नाम अस्ति ?

(घ) भारतं प्रबलं राष्ट्रं कथं भवेत् ?

एकदशः पाठः

गङ्गा नदी

गङ्गा भारतवर्षस्य पवित्रतमा नदी वर्तते। इयं हिमालयस्य गोमुखस्थानात् प्रभवति। बंगोपसागरे गङ्गासागरनामके स्थाने इयं सागरजलेन मिलति।

गङ्गातटे बहूनि नगराणि सन्ति। अस्माकं बिहारस्य राजधानी पाटलिपुत्रमपि गङ्गायाःतटे स्थितम् अस्ति। गङ्गाजलम् अतिपवित्रं भवति। अस्याः जलेन धार्मिकं कार्यम् भवति । हिन्दूधर्मावलम्बिनां सर्वेषु शुभकार्येषु गङ्गाजलस्य आवश्यकता भवति।

गङ्गायाम् अनेकाः नद्यः मिलन्ति। तासु यमुना-सरयू-गंडकी-कौशिकी प्रभृतयः सन्ति। गङ्गायाः तटे हरिद्वार-प्रयाग-काशी-प्रभृतीनि प्रसिद्धतीर्थस्थानानि सन्ति। गङ्गाजलेन कृषिभूमेः सेचनं भवति।

अधुना जनाः गङ्गाजलं प्रदूषितं कुर्वन्ति। गङ्गातटे स्थितानां नगराणां सर्वाणि मलजलानि गङ्गायां पातयन्ति। केचन मनुष्याणां पशूनाञ्च मृतशरीराणि नद्यां प्रवाहयन्ति। इदं न साधु कार्यम् अस्ति। नदीजले मलानां क्षेपणं वैज्ञानिकविचारेण धार्मिकविचारेण च न शोभनम्।

शब्दार्थः

भारतवर्षस्य	=	भारतवर्ष के
पवित्रतमा	=	सबसे पवित्र
वर्तते	=	है
हिमालयस्य	=	हिमालय के
गोमुखस्थानात्	=	गोमुख स्थान से
प्रभवति	=	निकलती है/निकलता है
बंगोपसागरे	=	बंगाल की खाड़ी में
गङ्गासागरनामके	=	गंगासागर नामक (में)
स्थाने	=	स्थान में
गङ्गातटे	=	गंगा के किनारे
बहूनि	=	बहुत
नगराणि	=	नगर (बहुवचन)
सन्ति	=	हैं
बिहारस्य	=	बिहार की
पाटलिपुत्रम्	=	पटना
गङ्गायाः	=	गंगा के
तटे	=	तीर पर
स्थितम्	=	बसा हुआ
अस्ति	=	है
अति	=	बहुत
पवित्रम्	=	पवित्र/स्वच्छ
भवति	=	होता है
अस्याः	=	इसकी
जलम्	=	पानी
शास्त्रानुसारेण	=	शास्त्र के अनुसार
तु	=	तो
धर्मावलम्बिनाम्	=	धर्म को मानने वाले

सर्वेषु	=	सभी में
तासु	=	उनमें
कौशिकी	=	कोशी
प्रभृतीनि	=	इत्यादि
सेचनम्	=	सिंचाई
पातयन्ति	=	गिराते हैं
केचन	=	कुछ
प्रवाहयन्ति	=	प्रवाहित करते हैं
साधु	=	अच्छी तरह
क्षेपणम्	=	फेंकना

व्याकरणम्

पवित्रतमा (स्त्री0), पवित्रतमः (पु0), प्रभवति = प्र + $\sqrt{भू}$ + लट्लकार

व्याख्या : 'भू' धातु के लट्लकार में 'भवति' रूप होता है जिसका अर्थ है = होता है। परंतु 'प्र' उपसर्ग लगने पर 'प्रभवति' शब्द का निर्माण होता है जिसका अर्थ है उत्पन्न होना। इसी प्रकार उपसर्ग लगने पर धातु का अर्थ बदल जाता है।

बंग + उपसागरे = बंगोपसागरे । गंगाजलस्य + आवश्यकता = गंगाजलस्यावश्यकता ।

$\sqrt{मिल्}$ + लट्लकार = मिलति। $\sqrt{अस्}$ + लट्लकार = अस्ति। $\sqrt{अस्}$ + लट्लकार बहुवचन = सन्ति।

$\sqrt{कृ}$ + लट्लकार, बहुवचन = कुर्वन्ति।

प्रेरणार्थक क्रिया का प्रयोग :–

पतति (गिरता है)	– पातयति (गिराता है)	– पातयन्ति (गिराते हैं)
पठति (पढ़ता है)	– पाठयति (पढ़ाता है)	– पाठयन्ति (पढ़ाते हैं)
लिखति (लिखता है)	– लेखयति (लिखवाता है)	– लेखयन्ति (लिखवाते हैं)
चलति (चलता है)	– चालयति(चलाता है)	– चालयन्ति (चलाते हैं)

वाक्य-प्रयोग :–

पत्ता गिरता है	=	पत्रं पतति।
बालक जल गिराता है	=	बालकः जलं पातयति।
छात्र पढ़ता है	=	छात्रः पठति।
शिक्षक पढ़ाते हैं	=	शिक्षकः पाठयति।
वह लिखता है	=	सः लिखति।
सीता पत्र लिखवाती है	=	सीता पत्रं लेखयति।
हाथी चलता है	=	गजः चलति।
वह साइकिल चलाता है	=	सः द्विचक्रिकां चालयति।

अभ्यासः

मौखिकः

1. निम्नलिखित शब्दों का शुद्ध उच्चारण करें-

(क)	गङ्गायाः	गङ्गायाम्	गङ्गया
	लतायाः	लतायाम्	लतया
	सीतायाः	सीतायाम्	सीतया
	अयोध्यायाः	अयोध्यायाम्	अयोध्यया
	गीतायाः	गीतायाम्	गीतया
(ख)	जलम्	जलेन	जलात्
	फलम्	फलेन	फलात्
	दुग्धम्	दुग्धेन	दुग्धात्
	ग्रामम्	ग्रामेण	ग्रामात्
	विद्यालयम्	विद्यालयेन	विद्यालयात्

लिखितः

2. कोष्ठ में दिए गए शब्दों से तृतीया विभक्ति का रूप देकर रिक्त स्थानों को भरें:-

जैसे- सीता <u>रामेण</u> सह वनम् अगच्छत् (राम)

(क) मोहनः ..... सह विद्यालयं गच्छति। (सोहन)

(ख) लता ..... सह वाटिकां गच्छति। (सीता)

(ग) सीता ..... सह पुस्तकं पठति। (गीता)

(घ) रमेशः ..... लिखति। (कलम)

(ङ) मुकेशः ..... सह खादति। (मित्र)

3. सुमेलित करें :–

(i)	कृषकः	(क)	प्रवहति
(ii)	छात्रः	(ख)	उपचारं करोति।
(iii)	चिकित्सकः	(ग)	कृषिकार्यं करोति।
(iv)	गङ्गा	(घ)	भवनम्।
(v)	विद्यालयस्य	(ङ)	पठति।

4. मंजूषा में से सही शब्द चुनकर रिक्त स्थानों को भरें :–

सन्ति, बहूनि, पवित्रतमा, पातयन्ति, गङ्गाजलम्, प्रभवति, गङ्गाजलेन

(क) गङ्गा हिमालयात् ..... ।

(ख) नदीषु गङ्गा ..... अस्ति।

(ग) गङ्गातटे ..... नगराणि .....।

(घ) ..... जनाः पिबन्ति ।

(ङ) ..... कृषि-भूमेः सेचनं भवति।

(च) जनाः मलजलानि गङ्गायां ..... ।

5. **निम्नलिखित शब्दों का वर्ण-विच्छेद करें:-**

जैसे- रामः = र् + आ + म् + अः

गङ्गा =

हिमालयः =

गोमुखम् =

नगरम् =

भवति =

6. **निम्नलिखित विषयों पर संस्कृत में दो-दो वाक्य लिखें :–**

हिमालयः, विद्यालयः, दीपावली ।

7. **उत्तराणि लिखत :–**

(क) भारतस्य पवित्रतमा नदी का ?

(ख) गङ्गा कुतः प्रभवति ?

(ग) अस्याः जलं कीदृशं भवति?

(घ) शुभकार्येषु कस्याः जलस्य आवश्यकता भवति ?

(ङ) अधुना जनाः गङ्गाजलं किं कुर्वन्ति ?

✦✦✦

द्वादशः पाठः

नीतिश्लोकाः

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥1॥

यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चिन्न तत्र दिवसं वसेत् ॥2॥

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥3॥

अलसस्य कुतो विद्या अविद्यस्य कुतो धनम्।
अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ॥4॥

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम्।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥5॥

शब्दार्थः

प्रियवाक्यप्रदानेन	=	प्रिय वचन बोलने से
तुष्यन्ति (√तुष् + लट्)	=	प्रसन्न होते हैं
जन्तवः (जन्तु, प्रथमा, बहु०)	=	सब प्राणी
तदेव (तद् + एव)	=	वही
वक्तव्यम् (√वच् + तव्यत्)	=	बोलना चाहिए
दरिद्रता	=	निर्धनता, कंजूसी
सम्मानः	=	आदर
प्रीतिः	=	प्रसन्नता
विद्यागमः (विद्या + आगमः)	=	ज्ञान की प्राप्ति, शिक्षा की व्यवस्था
वसेत् (√वस् + विधिलिङ्)	=	रहे, रहना चाहिए
काव्यशास्त्र-विनोदेन	=	काव्य और शास्त्र के विषय में चर्चा से
धीमताम् (धीमत् + षष्ठी बहु०)	=	बुद्धिमानों का
व्यसनेन	=	दुःख से / बुरे कार्य से
निद्रया (निद्रा + तृतीया)	=	नींद से / सोते हुए
कलहेन	=	झगड़ा / वाद-विवाद से
अलसस्य	=	आलसी का
कुतः	=	कहाँ से, कैसे
अविद्यस्य	=	विद्या से हीन व्यक्ति का
अधनस्य	=	धनहीन का
अमित्रस्य	=	मित्रों से रहित व्यक्ति का
श्रोत्रस्य	=	कान का

अभ्यासः

मौखिकः

1. **पाठ में दिए गए श्लोकों को सस्वर गाएँ ।**

लिखितः

2. मञ्जूषा से उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करें :–

जन्तवः, धीमताम्, कलहेन, का

(क) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति ..... ।

(ख) तस्मात्तदेव वक्तव्यं वचने ..... दरिद्रता ।

(ग) काव्यशास्त्रविनोदेन कालो गच्छति ..... ।

(घ) व्यसनेन तु मूर्खाणां निद्रया ..... वा ।

3. श्लोकों को जोड़ें :–

(क)		(ख)	
(क)	काव्यशास्त्रविनोदेन	(i)	सर्वे तुष्यन्ति जन्तवः
(ख)	हस्तस्य भूषणं दानं	(ii)	कालो गच्छति धीमताम्
(ग)	प्रियवाक्यप्रदानेन	(iii)	न प्रीतिर्न च बान्धवाः
(घ)	यस्मिन् देशे न सम्मानो	(iv)	अविद्यस्य कुतो धनम्
(ङ)	अलसस्य कुतो विद्या	(v)	सत्यं कण्ठस्य भूषणम्

4. **उपयुक्त कथनों के सामने सही ☑ का तथा अनुपयुक्त कथनों के सामने गलत ☒ का चिह्न लगाएँ :–**

यथा– प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति। ☑

मूर्खाणां कालः काव्यशास्त्रविनोदेन गच्छति। ☒

(क) दानं हस्तस्य भूषणम् । ☐

(ख) सत्यं श्रोत्रस्य भूषणम् । ☐

(ग) धीमतां कालः निद्रया गच्छति। ☐

(घ) यत्र सम्मानः तत्र वसेत्। ☐

(ङ) श्रोत्रस्य भूषणं शास्त्रम् । ☐

5. संस्कृत में अनुवाद करें :–

(क) राम घर जाता है ।

(ख) मोहन पुस्तक पढ़ता है ।

(ग) शीला पत्र लिखती है ।

(घ) राकेश फल खाता है ।

(ङ) मुकेश सत्य बोलता है ।

6. **उत्तराणि लिखत :–**

(क) सर्वे जन्तवः केन तुष्यन्ति ?

(ख) कुत्र न वसेत् ?

(ग) धीमताम् कालः कथं गच्छति ?

(घ) मूर्खाणां कालः कथं गच्छति ?

(ङ) हस्तस्य भूषणं किम् ?